
इस पाठ्यक्रम का उद्देश्य विद्यार्थियों को भारतीय राष्ट्रीय आंदोलन से परिचित कराना है जिससे वे समझ सकें कि किस प्रकार भारत ने साम्राज्यवादी एवं उपनिवेशवादी ताकत के खिलाफ संघर्ष कर स्वतंत्रता प्राप्त की। यह पाठ्यक्रम भारत के स्वतंत्रता आंदोलन, संवैधानिक विकास संविधान निर्माण की प्रक्रिया,संविधान सभा वाद विवाद, संविधान निर्माण की प्रक्रिया के साथ ही संविधान के दार्शनिक आधारों, प्रस्तावना एवं संविधान की मूलभूत विशेषताओं से भी परिचय कराता है। सभी नागरिकों को उनके मूल अधिकारों कर्तव्य एवं नागरिकता संबंधी प्रावधानों की गहरी जानकारी एवं जागरूकता भी इस पाठ्यक्रम का ध्येय है।

### 3.2.2 अधिगम परिणाम (Learning Outcome)

इस पाठ्यक्रम का अध्ययन करने के पश्चात निम्नलिखित बिन्दुओं को स्पष्ट कर सकेंगे -

- स्वतंत्रता के आंदोलन एवं आजादी के लिए किए गए अथक प्रयासों एवं बलिदानों के ज्ञान एवं महत्व की अनुभूति होगी।
- राष्ट्रीय चेतना, राष्ट्रीय आंदोलन एवं संवैधानिक विकास की चरणबद्ध जानकारी प्राप्त होगी।
- संविधान सभा वाद विवाद एवं संविधान निर्माण प्रक्रिया की समझ से संविधान को समझने की क्षमता का विकास होगा।
- संविधान के ऐतिहासिक दार्शनिक एवं प्राचीन स्रोतों एवं विशेषताओं का ज्ञान प्राप्त होगा
- संस्कृत में एवं प्राचीन भारतीय ज्ञान परंपरा में संविधान, संसद एवं लोकतंत्र के सूत्रों की जानकारी मिलेगी।
- संविधान के उद्देश्य, लक्षण विशेषताओं एवं आदर्शों की समझ तथा राष्ट्रवाद की भावना का विकास होगा।

**पाठ्यांश-I**

- भारतीय राष्ट्रीय आंदोलन की विरासत एवं रणनीतियाँ
- भारतीय राष्ट्रीय आंदोलन
- भारत का संवैधानिक विकास

### पाठ्यांश-II

- संविधान का अर्थ एवं संविधानवाद
- भारतीय संविधान की ऐतिहासिक एवं सांस्कृतिक पृष्ठभूमि
- संविधान सभा का निर्माण
- संविधान निर्माण की प्रक्रिया

### पाठ्यांश-III

- विभाजन विभीषिका
- अंतरिम  सरकार
- संविधान के स्रोत
- संविधान की विशेषताएँ

### पाठ्यांश-IV

- नागरिकता,
- मूल अधिकार, मूल कर्त्तव्य
- नीति निदेशक सिद्धांत
- अधिकार एवं निर्देशक सिद्धांतों के अन्तः सम्बंध

### 3.2.3 प्रायोगिक (Practicum)

1- विभाजन विभीषिका से संबंधित विविध घटनाओं, कहानियों एवं अनुभवों को एकत्र कर एक शोध पत्र तैयार करें।

अथवा

संविधान सभा की बहस से संबंधित सभी दस्तावेजों की जानकारी प्राप्त करें।

2- उन सभी देशों की सूची बनाएं जो कभी उपनिवेशवाद के शिकार रहे हैं तथा उन सभी की वर्तमान राजनीतिक आर्थिक स्थिति का तुलनात्मक विश्लेषण करना।

अथवा

3- संविधान निर्माण की प्रक्रिया को समझने के लिए एक युवा संसद का आयोजन।

4- मौलिक अधिकारों की गहन समझ के लिए उससे संबंधित न्यायपालिका के सभी निर्णयों का अध्ययन करना।

अथवा

आजादी के आंदोलन में संस्कृतज्ञों की भूमिका का मूल्यांकन कीजिए।

5- जीवन के अधिकार के संदर्भ में सर्वोच्च न्यायालय द्वारा किए गए सभी निर्णय का विश्लेषण कीजिए।

अथवा

भारतीय ज्ञान प्रणाली में संविधान और गणतंत्र के ऐतिहासिक सांस्कृतिक सूत्रों का विश्लेषण करें।

**3.2.4 प्रवचन प्रक्रिया (Mode of Transaction)**

- व्याख्यान विधि
- फलक विधि
- दृष्टांत विधि
- समस्या समाधान आधारित शिक्षण विधि
- प्रश्नोत्तर विधि
- ई - सामग्री
- वीडियो
- प्रायोगिक

**3.2.5 आकलन प्रक्रिया (Mode of Assessment)**

- सतत मूल्यांकन
- लिखित परीक्षा
- मौखिक परीक्षा
- गृह कार्य
- असाइनमेंट
- गूगल फॉर्म
- प्रश्नावली & क्विज
- प्रोजेक्ट

**3.2.6 स्वाध्याय सामग्री (Reading Material)**


- कदम् उमेश, 2022,इंडिया, मदर ऑफ डेमोक्रेसी, आईसीएचआर, दिल्ली
- उपाध्याय विभा,2022, प्राचीन भारत में जनतंत्र, लिटरेरी सर्किल, जयपुर
- चंद्रा, विपिन (2009) भारतीय राष्ट्रीय आंदोलन, अनामिका पब्लिशर।
- बसु, डी. डी. (2023) भारतीय सविधान, लेक्सिसनेक्सिस।




Nsharma

- त्रिपाठी, हरिहरनाथ (1965) प्राचीन भारत में राज्य और न्यायपालिका, मोतीलाल बनारसीदास, वाराणसी, प्रथम संस्करण।
- शास्त्री गणपति (2006) कौटिल्य अर्थशास्त्र, मूल टीका सहित, राष्ट्रीय संस्कृत संस्थान, नई दिल्ली।
- गैरोला, वाचस्पति, व्याख्याकार (2006) कौटिल्य अर्थशास्त्र, चौखंबा विद्याभवन, वाराणसी।
- शास्त्री, आर. शाम (1960) कौटिल्य अर्थशास्त्र, मैसूर प्रिंटिंग एंड पब्लिशिंग हाउस, मैसूर।
- काश्यप, सुभाष (2017) हमारा सविधान, नेशनल बुक ट्रस्ट, इंडिया, नई दिल्ली।
- फड़िया, बी. एल. (2006) भारतीय शासन एवं राजनीति, साहित्य भवन पब्लिकेशन, आगरा।
- सईद, एस. एम. (2023) भारतीय राजनीतिक व्यवस्था, भारत बुक सेंटर, लखनऊ।
- जैन, डॉ. पुखराज, फडिया (2022) भारत का राष्ट्रीय आन्दोलन तथा भारतीय संविधान, साहित्य भवन पब्लिकेशंस, आगरा।
- R. Pradhan (2008) Raj to Swaraj, New Delhi: Macmillan
- Zoja Hasan (ed.) (2000) Politics and the State in India, Delhi, Sage.
- Bipin Chandra et. el. (ed.) India After Independence, Delhi, Viking 1999
- Subhash Kashyap, 1994, Making of the Constitution, in Our Constitution: An Introduction to India's Constitution and Constitutional Law, NBT, India.
- Granville Austin, 1966, The Constituent Assembly- Microcosm in Action, in Indian Constitution, Cornerstone of a Nation, OUP.
- D D Basu, 2011, The Historical background, in Introduction to the Constitution of India 20th ed, Lexisnexis, India.

## 3.7 रङ्गमञ्चः

**सत्रार्द्धः - 3** **श्रेयोऽङ्कः - 4**

**3.7.1 पाठ्यपरिचयः (About the course)**

आङ्गिकाभिनयो रसदृष्टिश्च - अत्र आङ्गिकोऽभिनयो रसदृष्टिश्च मुख्यरूपेण पाठ्यौ स्तः।

**3.7.2 अधिगमपरिणामः ( Learning Outcome)**

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- आङ्गिकाभिनयं बोधयितुं शक्ष्यन्ति।
- रसदृष्टेः स्वरूपं प्रतिपादयितुं प्रभविष्यन्ति।
- मुखजान् अभिनयान् बोधयितुं सामर्थ्यं लप्स्यन्ते।
- हस्ताभिनयस्य प्रतिपादने शक्ता भविष्यन्ति।
- पाठ्यस्य अभिनयस्य प्रायोगिकं ज्ञानं प्राप्स्यन्ति।
- रस-भावयोरभिनयेन प्रदर्शने समर्था भविष्यन्ति।

| पाठ्यांशः(Unit) | विवरणम् |
|---|---|
| 1 – आङ्गिकाभिनयः | • अभिनयस्वरूपम् ।<br>• अभिनयस्य प्रभेदः विषयवस्तु च ।<br>• मस्तकाभिनयस्तल्लक्षणञ्च । मस्तकाभिनयस्य रसभावेषु विनियोगः। |
| 2 – रसदृष्टिः | • रसदृष्टिः तल्लक्षणञ्च ।<br>• दृष्टिस्वरूपम्। (बीभत्सान्ताः-कान्तादि)<br>• स्थायि (मदिरान्ताः-स्निग्धादि) दृष्टिः-<br>• दृष्टिभेदस्य रसभावेषु योजना |
| 3 – मुखजाभिनयः | • पुटकर्मप्रभेदस्तल्लक्षणञ्च ।<br>• भ्रुकुटीकर्मप्रभेदस्तल्लक्षणञ्च ।<br>• नासाकर्मप्रभेदस्तल्लक्षणञ्च ।<br>• कपोलकर्म मुखरागप्रभेदाः तल्लक्षणानि-चिबुककर्म-अधरोष्ठकर्म-च |



JSRaneeno

4 – **हस्ताभिनयः**

- असंयुतहस्ताः (ताम्रचूडान्ताः हस्ताः - पताकहस्तादि)
- संयुतस्ताः (स्वस्तिकान्ताः हस्ताः-अञ्जल्यादि)
- हस्तप्रचारस्तल्लक्षणञ्च ।
- हस्तकरणादिप्रकाराः ।

**3.7.3 प्रायोगिकम् (Practicum)**

1. प्रदत्तविषयानुसारेण लेखनम् ।
2. प्रदत्तविषयानुसारेण वीडियोनिर्माणम् ।
3. प्रदत्तविषयानुसारेण भाषणम् ।
4. रस-भावयोरभिनयेन प्रदर्शनम् ।
5. आधुनिकचलच्चित्रादिषु रस-भावयोरनुसन्धानम् ।
6. रस-भावविशेषाभिव्यञ्जकानां पटकथादीनां लेखनम्।

**3.7.4 प्रवचनप्रक्रिया (Mode of Transaction)**

व्याख्यानविधिः प्रयोगविधिश्चाश्रयणीयः। पूर्वं प्रतिपदपदार्थं बोधनीयम्, भावार्थः प्रतिपादनीयः, ततो विषयाणां यथासंभवं प्रयोगो विधेयः। अभिनयस्थलं प्रति छात्राध्यापका नेयाः। पाठ्यानुसारेण अभिनयः प्रर्शनीयः। छात्राध्यापका अभिनयं कर्तुं वाच्याः।

**3.7.5 आकलनप्रक्रिया (Mode of Assessment)**

- भाषाशुद्धिः ।
- अभिव्यक्तिकौशलम्।
- व्यवहारः।
- प्रश्नमञ्चः।
- नियमितता।
- अधिगमसामर्थ्यम्, परियोजनाकार्याणि, प्रयोगकार्याणि च।

**3.7.6 स्वाध्यायसामग्री (Reading Material)**

- **पाठ्यग्रन्थः**-नाट्यशास्त्रम्- अष्टमोऽध्यायः, नवमोऽध्यायश्च
- अभिनयदर्पणः -एम. एम. घोषः, कलकत्ता, 1957

## 4.1 माध्यमिकस्तरे शिक्षणशास्त्रस्य मूलाधाराः

**सत्रार्द्धः - 3** **श्रेयोऽङ्काः - 4**

### 4.1.1 पाठ्यपरिचयः (About the course)

अयं पाठ्यक्रमः माध्यमिकस्तरे शिक्षणशास्त्रस्य आधारभूतैः विविधविषयैः सह सम्बद्धः अस्ति, यद्धि छात्राध्यापकान् बहुमूल्यज्ञानेन, क्षमताभिः दक्षताभिश्च सुसम्पन्नान् करिष्यति। अस्मिन् पाठ्यक्रमे चतुर्भिः पाठ्यांशैः सह प्रायोगिककार्याणि अपि सन्ति। अयं पाठ्यक्रमः माध्यमिकस्तरीयविद्यार्थिनम् अवबुध्य तस्य शिक्षणव्यूहरचनां निर्मातुं छात्राध्यापकान् समर्थान् करोति। अयं पाठ्यक्रमः समग्रतया आवश्यकशिक्षणोपकरणैः, ज्ञाननिधिना, क्षमताभिः, व्यावसायिकदक्षताभिश्च समग्रभावेन आत्मनः छात्रेषु समाजे च सकारात्मकं प्रभावं समुत्पादयितुं छात्राध्यापकान् सुसज्जितान् करोति। अस्मिन् पाठ्यक्रमे शिक्षणशास्त्रस्य उद्देश्यानुगुणं लक्ष्यानुगुणं च आधारभूतसिद्धान्तैः अवधारणाभिश्च सदृढतया आधारशिला स्थापयिष्यते। अयं पाठ्यक्रमः शिक्षणार्थिनः समग्रविकासं शिक्षणं च सौविध्यपूर्णं कर्तुं व्यापकतया आकर्षकं सहायकं च वातावरणं निर्मातुं तेषां पृष्ठभूमिं व्यापकतया द्रष्टुम् आग्रहं करोति। अयं पाठ्यक्रमः छात्राध्यापकेभ्यः शिक्षणाधिगमव्यूहानां विस्तृतयोजनानां श्रृंखलया संरचितः अस्ति। अत्र एतदर्थमपि मुख्यावधानं दत्तमस्ति यत् शिक्षणयै नवीनां युगपरिवर्तनकारिकां च दृष्टिं निधाय छात्राध्यापकः आजीवनं शिक्षणर्थिरूपेण आत्मानं साधयेदिति। इत्थं व्यावसायिकविकासस्य अवसराणां माध्यमेन छात्राध्यापकाः शैक्षिकपरिदृश्यस्य परिवर्तनशीलावश्यकतानां पूर्तये इतोऽपि उत्कृष्टरूपेण सज्जाः भूत्वा भाविसमाजस्य शिक्षणर्थिवर्गं प्रेरयितुं शक्नुयुरिति।

### 4.1.2 अधिगमपरिणामः (Learning Outcome)

एतस्य पाठ्यक्रमस्य सम्पूर्तौ छात्राध्यापकः सामर्थ्यवान् भविष्यति -

- माध्यमिकस्तरस्य अध्येतुः विषये व्यापकावगमनदृष्टेर्निर्माणम्।
- माध्यमिकस्तरीयशिक्षणर्थिनां शारीरिक-मानसिक-सामाजिक-भावनात्मकविकासस्य आकलनम्।
- माध्यमिकस्तरीयशिक्षणर्थिनाम् अद्वितीयक्षमतानां शक्तीनां च समवलोकनं प्रत्यभिज्ञानम् आत्मनः कौशलस्य विकासश्च।
- प्रभावपूर्णानां शिक्षणाधिगमव्यूहानां क्रियान्वयनाय आवश्यकज्ञानस्य कौशलस्य च विषये चर्चा।
- मूल्याधारितशिक्षणस्य प्रोत्साहनाय समृद्ध-समावेशात्मकस्य च शिक्षणवातावरणस्य निर्माणम्।
- विविधानां शिक्षणशास्त्रीयानाम् उपागमानाम् अपि च अधिगन्तृषु तेषां प्रभावस्य गहनावगमनसामर्थ्यस्य विकासः।
- निर्देशात्मकाभ्यासानां विषये अभिज्ञानम्।
- विद्यार्थिनां कृते प्रभावपूर्णशिक्षणानुभवान् सौविध्यपूर्णं कर्तुं शिक्षणशास्त्रस्य महत्त्वपूर्णभूमिकायाः परिज्ञानम्।
- सततरूपेण व्यावसायिकविकासाय आवश्यकज्ञानस्य कौशलानां च रूपरेखानिर्माणम्।



JsRaniera

### पाठ्यांशः 1

**माध्यमिकस्तरीयानां शिक्षणार्थिनाम् अवगमनम्**

क. शिक्षणार्थिनां तेषां पृष्ठभूमेश्च अवगमनम्।

1. शिक्षणार्थिनां चिन्तनप्रक्रिया संज्ञानात्मककौशलानि च।
2. शिक्षणार्थिनां सामाजिकं शैक्षणिकं च जीवनम्।
3. माध्यमिकस्तरीयशिक्षणार्थिनां सङ्घर्षः समाह्वनानि च।
4. माध्यमिकस्तरीयशिक्षणार्थिनां विशेषताः।

ख. बालकस्य अद्वितीयक्षमतानां समवलोकनम्।

### पाठ्यांशः 2

**शिक्षणस्य अधिगमस्य च व्यूहाः**

क. शिक्षण-अधिगमव्यूहानाम् अवगमनम्।

1. शिक्षणस्य अवधारणा, विशेषताः कार्याणि च।
2. अमूर्तावधारणाः आनन्दपूर्णरूपेण वास्तविकजीवनस्य परिस्थितिभिः सह संयोजनम्।
3. विविधविषयाणाम् एकीकरणेन बहु-विषयकशिक्षणयाः प्रोत्साहनम्।
4. अधिगमे शिक्षणर्थिनां संयोजनस्य सहभागस्य च प्रोत्साहनम्।
5. कलायुक्तगतिविधिनां, सामुदायिकसंयोजनस्य च माध्यमेन मूल्यानां निर्माणम्।
6. विविधविषयाणां समेकीकरणेन बहुविषयकशिक्षणयाः प्रोत्साहनम्।
7. स्वास्थ्यं सामाजिकसंवेदनशीलता च इत्यनयोः प्रोत्साहनम्।
8. सांस्कृतिकपारम्परिकनिधिं प्रति सम्मानभावस्य विकासः।
9. आनन्ददायकाधिगमस्थानरूपेण समावेशपूर्णरूपेण च कक्षायाः विकासः।

ख. शिक्षण, पाठ्यक्रमः शिक्षणशास्त्रोद्देश्यानि मूल्यानि च इत्येतेषां पारस्परिकसम्बन्धः।

### पाठ्यांशः 3

**शिक्षणशास्त्रीयोपागमाः**

क. शिक्षणशास्त्रीयोपागमाः - संरचनावादोपागमः, सहयोगात्मकोपागमः, चिन्तनशीलोपागमः, एकीकृतोपागमः, परिपृच्छाधारितोपागमः, अन्ये समसामयिकोपागमाः च; कलान्वितः अधिगमः; क्रीडान्वितः अधिगमः।

ख. शिक्षणशास्त्रस्य प्रकाराः - सामाजिकशिक्षणशास्त्रम्, आलोचनात्मकं शिक्षणशास्त्रम्, सांस्कृतिकरूपेण प्रतिस्पन्दितं शिक्षणशास्त्रम्, समावेशितव्यवस्थायां सुकरातविचारान्वितं शिक्षणशास्त्रम्।

ग. प्रभावपूर्णशिक्षणे शिक्षणशास्त्रस्य भूमिका - शिक्षणशास्त्रं शिक्षणर्थिनं कथं प्रभावितं करोति?



HSRaheo

## पाठ्यांशः 4

### शिक्षकस्य चारित्रिकविशेषताः सततव्यावसायिकविकासश्च

क. भाषाशिक्षकस्य चारित्रिकविशेषताः ।

ख. संस्कृतेः भाषायाश्च प्रोत्साहकरूपेण भाषाशिक्षकस्य उत्तरदायित्वानि ।

ग. शिक्षणशास्त्रीयदक्षता, व्यावसायिकक्षमता, नैतिकशुचिता, पाठ्यविषयस्य अद्यतनीकरणं च इत्येतेषाम् अर्थः आवश्यकता च ।

घ. व्यावसायिकविकासाय गतिविधयः - सङ्गोष्ठी, सम्मेलनम्, अभिमुखीकरणकार्यक्रमः, कार्यशाला, प्रतिस्पर्धाः, प्रकाशनम्, भौतिकपाठ्यक्रमः आभासीयपाठ्यक्रमः च, शिक्षणपोर्टफोलियो इत्यस्य विकासः, क्षमतावर्धककार्यक्रमाः, शिक्षकविनिमयकार्यक्रमश्च ।

ङ. लैङ्गिसमस्याः, समानता, समावेशनम्, नैतिकसमस्याः, पर्यावरणीयसमस्याः, मानवस्वास्थ्यं कल्याणं च, जनसंख्यावृद्धिः, मानवाधिकारः, अन्यविधसमस्याः (कोरोना प्रभृतिभिः महारोगैः सम्बद्धाः भावनात्मक-मानसिक-शारीरिकसमस्याः) इत्यादीनां समस्यानां समाधानदिशा व्यावसायिकदक्षतायाः विकासः ।

### 4.1.3 प्रायोगिकम् (Practicum)

1. क्षेत्रभ्रमणमाध्यमेन शिक्षणयां नैतिकसमाह्वानानां सामाजिकसमाह्वानानां च विषये जागरूकतावर्धनम् ई-पोर्टफोलियो निर्माणं च।

   अथवा

   सततव्यावसायिकविकासस्य अवधारणां प्रबोद्धुं कस्याञ्चित् कार्यशालायां सङ्गोष्ठ्यां वा प्रतिभागितां कृत्वा आजीवनम् अधिगमे एतस्य महत्त्वं विज्ञाय निबन्धलेखनम्।

2. सम्बन्धितविषयस्य शैक्षणिकायामानां सन्दर्भे राष्ट्रीयशिक्षणनीतेः (2020) विश्लेषणम्।

   अथवा

   आत्मनः उच्चशिक्षणसंस्थायाः पक्षतः प्रदत्ता कापि परियोजना।

3. राष्ट्रीयशिक्षकव्यावसायिकमानकानां (एन्.पि.एस्.टी.) राष्ट्रीयपरामर्शदातृ-अभियानस्य (एन्.एम्.एम्.) च सन्दर्भे 'नवाचारितः शिक्षकः' इत्यस्य गुणानां विश्लेषणं चिन्तनं च।

   अथवा

   राष्ट्रीयशिक्षकपोर्टल, निष्ठा (NISHTHA), दीक्षा (DIKSHA), स्वयम् (SWAYAM) सदृशानां विविधानां जालस्थानकानाम् अन्वेषणं कृत्वा एकस्य सद्यस्कपाठ्यक्रमस्य प्रतिवेदननिर्माणम्।

4. लैङ्गिकम्, समानता, समावेशः च इत्येतेषां विषये विविधशिक्षणर्थिनाम् आवश्यकतापूर्तये शिक्षणाधिगमरणनीतीनां विकासः, पीपीटी प्रदर्शनं च।

   अथवा



YsRamu

उत्तमशिक्षकस्य विषये केषाञ्चन् अपि पञ्चानां श्लोकानां कण्ठस्थीकरणपुरस्सरं विशेषार्थकथनयोग्यतासम्पादनम्।

**4.1.4 प्रवचनप्रक्रिया (Mode of Transaction)**

चर्चात्मकं व्याख्यानम्, परियोजनाधारितविधिः, समस्यासमाधानविधिः, प्रयोगात्मकाधिगमः, कलान्विताधिगमः, क्रीडान्विताधिगमः, सूचनासम्प्रेषणप्रौद्योगिकीयुक्तः अधिगमः, अन्तःक्रियात्मकविधयः यथा समूहचर्चा, सब्रह्मचारिशिक्षणम्, कार्यशाला, समवलोकनम्, पीपीटीप्रदर्शनानि।

**4.4.1.5 आकलनप्रक्रिया (Mode of Assessment)**

पोर्टफोलियो सर्जनम्, लिखितपरीक्षणानि, कक्षासु पीपीटीप्रदर्शनम्, सङ्गोष्ठी, सत्रीयकार्याणि, प्रायोगिककार्याणि, गृहकार्याणि, आन्तरिकसत्रीयपरीक्षणानि (विश्वविद्यालयानुदानायोगस्य नियमानुगुणम्)

**4.1.5 स्वाध्यायसामग्री (Reading Material)**

- राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषदः अप्रेल, 2022 राष्ट्रीयपाठ्यचर्यारूपरेखायाः विकासाय शासनादेश-दिशानिर्देशसम्बद्धाः अभिलेखाः।
- राष्ट्रीयशिक्षणनीतिः 2020, शिक्षणमन्त्रालयः, भारतशासनम् (आङ्ग्लम् हिन्दी च)
- राष्ट्रीयपाठ्यचर्यारूपरेखायाः (2023) कृते राष्ट्रीयसञ्चालनसमितिः विद्यालयशिक्षणयाः कृते राष्ट्रीयपाठ्यचर्यायाः रूपरेखायाः प्रारूपम्।
- राष्ट्रीयशिक्षणनीतिः 1968, 1986, 2020

**7.1 व्यावसायिक-क्षमतोन्नयनं सामुदायिकसेवा च - वाग्वर्धिनी (संस्कृतम्)**



YsRamaro

## चतुर्थसत्रार्द्धः (IV[rd] Semester)

| क्रं.सं. | पाठ्यचर्यात्मकघटका: | पाठ्यविषया: | प्रतिसत्रार्धं श्रेयोऽङ्का: चतुर्थसत्रार्द्धः | पाठ्यविषयश: श्रेयोऽङ्का: |
|---|---|---|---|---|
| 2.2 | शिक्षाया: आधारा: | शिक्षायाः दार्शनिकं सामाजिकञ्च परिप्रेक्ष्यम्- I | 4 | 4 |
| 3.1 | * (किमपि एकं शास्त्रं चिनोतु)<br>**शास्त्रीयविषया:/ अन्त:शास्त्रीयविषया: (विद्यालयपाठ्यचर्यात:)** | **साहित्यम् (प्रथमपत्रम्) -** शब्दशक्तिः (साहित्यदर्पणः-द्वितीयः परिच्छेदः)<br>**साहित्यम् (द्वितीयपत्रम्) -** शकुन्तलादुष्यन्तयोः पुनः समागमः (अभिज्ञानशाकुन्तलम्- 4-7 अङ्काः) | 4 + 4 | 8 |
| | | **व्याकरणम् (प्रथमपत्रम्) -** भ्वादिधातुरूपसिद्धयः<br>**व्याकरणम् (द्वितीयपत्रम्) -** बहुव्रीहि-द्वन्द्व-एकशेष-सर्वसमासान्त-समासाश्रयविधयः | 4 + 4 | |
| | | **दर्शनम् (प्रथमपत्रम्) -**<br>**दर्शनम् (द्वितीयपत्रम्) -** | 4 + 4 | |
| | | **ज्योतिषम् (प्रथमपत्रम्)** - फलितज्योतिषम्<br>**ज्योतिषम् (द्वितीयपत्रम्)** - सिद्धान्तज्योतिषम् | 4 + 4 | |
| 3.2 | * (एकम् आधुनिकं विषयं चिनोतु) | **हिन्दी** - काव्यशास्त्र एवं आलोचना | 4 | 4 |
| | | **English** Literature | | |
| | | **मलयालसाहित्यम्** | | |
| | | **इतिहासः** - 3.2 भारत : संघर्ष एवं प्रतिरोध का काल (1200 ई. –1707 ई.) | | |
| | | **राजनीतिशास्त्रम्-** भारतीय शासन एवं राजनीति | | |
| | | **रङ्गमञ्चः** - प्रवृत्तिर्धमी च। | | |
| 4.1 | **माध्यमिकस्तरीयं विषयाधारितं शिक्षणशास्त्रम्** | (i) संस्कृतशिक्षणशास्त्रम् | 2 | 4 |

| | | | | |
|---|---|---|---|---|
| 4.4 | | (iv)आधुनिकविषयशिक्षणशास्त्रम्<br>**हिन्दी** - माध्यमिकस्तरीय भाषा–2 शिक्षणशास्त्र (भाषा-1) हिन्दी शिक्षण विधियाँ – 1<br>**आङ्गलम्** - Pedagogy of English Course - 1<br>**सामाजिकम्** - सामाजिकशिक्षणशास्त्रम् प्रथमः पाठ्यक्रमः (I)<br>**मलयालम्** - Content & Pedagogy Language-I, Secondary Stage Regional Language Malayalam/ **मलयालभाषाशिक्षणम्** | 2 | |
| 7.1 | व्यावसायिक-क्षमतोन्नयनं सामुदायिकसेवा च | **वाग्वर्धिनी**<br>आङ्ग्लम् | 1 | 1 |
| **आहत्य श्रेयोऽङ्काः** | | | **21** | **21** |

## 2.3 शिक्षायाः दार्शनिकपरिप्रेक्ष्याणि - I
## (Philosophical Perspectives of Education - I)

**सत्रार्द्धः 4** **श्रेयोऽङ्काः** 4

### 2.3.1 पाठ्यपरिचयः (About the course)

एतस्य पाठ्यक्रमस्य उद्देश्यं शैक्षिकदर्शनस्य तादृशम् अध्ययनं कर्तुं छात्राध्यापकेषु सामर्थ्योत्पादनमस्ति, यत्र शैक्षिकदर्शनस्य सम्प्रत्ययः, प्रकृतिः क्षेत्रं शैक्षिकदर्शनस्य उद्देश्यानि; शिक्षा दर्शनं च इत्यनयोः मध्ये सम्बन्धः, भारतीयदार्शनिकपरम्पराः तासां शैक्षिकनिहितार्थश्च, केषाञ्चन प्रमुखदार्शनिकसम्प्रदायानां यथा आदर्शवादः, प्रकृतिवादः, प्रयोजनवादः, प्रगतिवादः अस्तित्ववादः च इत्येतेषां विमर्शः शैक्षिकपरम्पराणां निहितार्थाश्च। अयं पाठ्यक्रमः दर्शनशास्त्रस्य पाश्चात्त्यसम्प्रदायानां तदीयोपागमानां च विश्लेषणाय अपि अवसरं प्रददाति।

### 2.3.2 अधिगमपरिणामः (Learning Outcome)

- सोद्देश्यं ज्ञानस्य प्रकृतिः, मानवस्य प्रकृतिः, समाजस्य प्रकृतिः च इत्येतेषां शैक्षिकनिहितार्थानाम् अन्वेषणम् अवगमनं च कर्तुम् छात्राध्यापकाणां प्रोत्साहनम्।
- भाविशिक्षकेभ्यः विद्या, अविद्या, शिक्षा एजुकेशन प्रभृतीनां शब्दानाम् अर्थज्ञापनम्। ततश्च प्राचीनभारतीयसाहित्यस्य आधारे एतेषां शब्दानां चिन्तनात्मकरूपेण अवगमनपुरस्सरं तेषु वैचारिकभेदं परिज्ञातुं सौविध्यप्रदानम्।
- समवयस्कसमूहे आत्मनः वास्तविकजीवनस्य सामाजिक-सांस्कृतिक-दार्शनिकसम्बद्धं चिन्तनशीलम् अनुभवं प्रकटयितुं भाविशिक्षकेभ्यः सौविध्यं प्रदाय भारतीयशैक्षिकसन्दर्भेषु दार्शनिकपरम्पराः, सामाजिकपरम्पराः सांस्कृतिकपरम्पराः चेत्यादीनां शब्दानाम् अर्थसङ्कल्पनाम् अवगन्तुं सामर्थ्यप्रदानम्।
- भारतस्य विश्वस्य च केषाञ्चन श्रेष्ठानां शिक्षाविदां शैक्षिकदृष्टेः अध्ययनम्, अवलोकनं अधिगमनं च कर्तुं भाविशिक्षकानाम् अभिमुखीकरणं सम्पृक्तीकरणं च। एतद्द्वारा शिक्षाप्रक्रियायां समसामयिकसम्बद्धतायां च तेषां दृष्टेः/लक्ष्यस्य च स्पष्टतया प्रतिबिम्बनं भवेत्।

#### पाठ्यांशः 1
#### शिक्षा दर्शनं च

क. सम्प्रत्ययात्मकस्पष्टता प्रकृतिः सम्बन्धश्च।

ख. शिक्षायाः दार्शनिकपरिप्रेक्ष्यस्य अध्ययनस्य उद्देश्यानि।

ग. तत्त्वमीमांसा, ज्ञानमीमांसा मूल्यमीमांसा च इत्येतेषां शैक्षिकनिहितार्थाः।

घ. भारतीयसन्दर्भेषु शिक्षायाः परिप्रेक्ष्यस्य अवगमनम् -

- वैदिक-बौद्ध-जैन-सिक्ख-मुस्लिम-परम्पराणां विशेषसन्दर्भे शिक्षायाः अर्थः, प्रकृतिः लक्ष्यं च।



JSRameeu

- दर्शनम्, परा अपरा च विद्ये, अविद्या, शिक्षा, संवादः, पञ्चकोशाः, गुरुकुलम्, आचार्यः, गुरुः, शिष्यः, उपाध्यायः, जिज्ञासा, स्वाध्यायः च इत्येतेषां पदानाम् अवगमनम्।

ङ. पाश्चात्यपरिप्रेक्ष्ये शिक्षायाः अवगमनम् -

- शिक्षायाः सञ्ज्ञानात्मकसिद्धान्तस्य व्यवहारवादिसिद्धान्तस्य विकासात्मकसिद्धान्तस्य च सन्दर्भे शिक्षायाः अर्थः, प्रकृतिः उद्देश्यानि च।

**पाठ्यांशः 2**

**दार्शनिकसम्प्रदायाः शिक्षा च**

क. निम्नलिखितानां वैचारिकसम्प्रदायानां सम्प्रत्ययात्मकस्पष्टतया सह तेषां शैक्षणिकाभ्यासानां निहितार्थः-

- **भारतीयाः** - सांख्यम्, योगः, न्यायः, वैशेषिकम्, मीमांसा, वेदान्तशास्त्रं च।
- **पाश्चात्याः** - आदर्शवादः, प्रकृतिवादः, प्रयोजनवादः यथार्थवादः, प्रगतिवादः अस्तित्ववादश्च।

पाठ्यांशः 3

**शैक्षिकविचारकाः**

क. निम्नलिखितानां विचारकाणाम् अध्यवसायिनां च विचारेभ्यः प्रवर्धितेषु शैक्षिकोद्देश्येषु प्रक्रियासु संस्थानेषु च विचारविमर्शः -

- **भारतीयाः** - स्वामी दयानन्दसरस्वती, स्वामी विवेकानन्दः, महर्षि अरविन्दः, रवीन्द्रनाथटैगोरः, मदनमोहनमालवीयः, महात्मागान्धिः, जे. कृष्णमूर्तिः गीजूभाई बधेक्।
- **पाश्चात्याः** - सुकरात, रूसो, प्लेटो, मारिया माण्टेसरी, फ्रेड्रिक फ्रोबेल, जॉन डीवी।

पाठ्यांशः 4

**मूल्यशिक्षा**

क. मूल्यानां सम्प्रत्ययः, अर्थः सार्थकता प्रकाराश्च।

ख. मूल्यानां शिक्षाशास्त्रीयः अभिप्रेतार्थः।

ग. गुरुशिष्यपरम्परा शैक्षिकमूल्यानि च।

घ. तैत्तरीयोपनिषदि दीक्षान्तोपदेशः।

ङ. भारतीयसंविधाने प्रतिष्ठापितानि मूल्यानि।

च. राष्ट्रीयशिक्षानीतिः 2020 तथा च अधिगमकर्तुः समग्रविकासे एतस्याः नीतेः प्रभावः।

**2.3.3 प्रायोगिकम् (Practicum)**

1. शिक्षायाः दार्शनिकपरिप्रेक्ष्याध्ययनस्य आवश्यकतायाः विश्लेषणात्मकाः लेखाः।

अथवा

कामपि एकां भारतीय शैक्षिक परम्पराम् अनुसृत्य तस्य अर्थ-उद्देश्य-प्रवृत्ती-लक्ष्याणाञ्च विश्लेषणात्मकमध्ययनम्।

2. प्राचीनभारतीयशैक्षिकसम्प्रदायानां समसामयिकप्रासङ्गिकतालेखनम्।

अथवा

पाश्चात्य शैक्षिकसम्प्रदायानां भारतीयसन्दर्भे समालोचनात्मकसमीक्षा।

3. प्रसिद्धभारतीयशिक्षाविदां शैक्षिकवादानां तद्द्वारा स्थापितसंस्थानां चर्चा एवं सामूहिकप्रतिवेदनलेखनम्।

अथवा

पाश्चात्याशिक्षाविदां शैक्षिकवादानां भारतीयपरिप्रेक्ष्ये समालोचनात्मकसमीक्षा।

4. मूल्यस्य अर्थ-आवश्यकता-प्रकार-विषयकानुसन्धानात्मकालेखलेखनम्।

अथवा

भारतीयप्राचीनगुरुशिष्यपरम्परायाः दीक्षान्तोपदेशस्य च समसामयिकावश्यकतामभिलक्ष्य आलेखलेखनम्।

### 2.3.4 प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायाम् अधोलिखितपाठ्यांशाः सम्मिलिताः भविष्यन्ति -

- बहुमाध्यमयुक्तं सुनियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, सामूहिकी अन्तःचर्चा, समूहाणां पारस्परिकचर्चा, लघुविषयकेन्द्रिता सङ्गोष्ठी, सहयोगात्मकशिक्षणं दलशिक्षणं च, श्रेष्ठशिक्षाविदां जीवनसम्बद्धपक्षाणाम् आधारे रचितसाहित्यस्य प्राथमिकस्रोतसां (मूलग्रन्थानाम्) द्वितीयकस्रोतसाम् (सन्दर्भग्रन्थानाम्) अध्ययनसंलग्नता, व्यक्तिवृत्ताध्ययनम्, अल्पकालिकपरियोजनाकार्यम्।
- छात्राध्यापकानां जगत् जीवनं च प्रति दृष्टिविकासाय तेषाम् अनुभवानां समालोचनात्मकं परीक्षणं कृत्वा तत् नवीकर्तुं दार्शनिकदृष्टिकोणस्य विश्लेषणं करणीयम्। छात्राध्यापकाः दृष्टिः, उद्देश्यानि, शैक्षिकप्रक्रिया, शिक्षासंस्थानं चेत्यादीनां तुलनात्मकं प्रपत्रं निर्मास्यन्ति। ते पठनाधारितं विचारविमर्शं कर्तुम्, चिन्तनपुरस्सरं शिक्षकप्रक्रियां समीक्षितुम्, प्रवेशविधानस्य/शिक्षारम्भस्य दीक्षान्तप्रक्रियायाः च सार्थकतां परिचेतुं प्रोत्साहिताः भविष्यन्ति।

### 2.3.5 आकलनप्रक्रिया (Mode of Assessment)

मूल्याङ्कनं परीक्षणाधारितं सत्रीयकार्याधारितं च भविष्यति।

### 2.3.6 स्वाध्यायसामग्री (Reading Material)

1. अग्रवाल, जे.सी. : शिक्षा दर्शन एक अध्ययन, दिल्ली, क्षिप्रा प्रकाशन।
2. ओड़, लक्ष्मीलाल : शिक्षा की दार्शनिक पृष्ठभूमि, जयपुर, राजस्थान हिन्दी-ग्रन्थ अकादमी।
3. कछवाहा, विजयपाल : भारतीयाः शिक्षाशास्त्रिणः, भोपालम्, रचना प्रकाशन।
4. कछवाहा, विजयपाल : शिक्षादर्शनम्, भोपालम, शिक्षादर्शनम्।



YSRawe

5. गैरोला, वाचस्पति (1995) : भारतीय दर्शन, इलाहाबाद, लोकभारती प्रकाशन।
6. चाँद किरण : शिक्षा दार्शनिक परिप्रेक्ष्य, दिल्ली, दिल्ली विश्वविद्यालय कार्यान्वयन निदेशालय।
7. झा, नगेन्द्र : वैदिक शिक्षा पद्धति एवं आधुनिक शिक्षा पद्धति, नई दिल्ली, वेङ्कटेश प्रकाशन।
8. द्विवेदी, देवीप्रसाद : प्राच्यशिक्षादर्शनम्, लखनऊ, गोमतीनगरम्।
9. पाठक, आर.पी. (2012) : विश्व के महान् शिक्षाशास्त्री, नई दिल्ली, पियर्सन एज्यूकेशन।
10.पाठक, आर.पी. (2011) : शिक्षा के दार्शनिक एवं समाजशास्त्रीय सिद्धान्त, नई दिल्ली, पियर्सन एज्यूकेशन।
11.पाठक एवं त्यागी : शिक्षा के दार्शनिक सिद्धान्त, आगरा, विनोद पुस्तक मन्दिर।
12.पाठक, दाताराम : शैक्षिकदर्शन एवं समाजशास्त्र भाग-1, नई दिल्ली, मान्यता प्रकाशनम्।
13.पाणिग्राही, निर्मला : शिक्षायाः नवीनाधाराः, भुवनेश्वरम्, दिव्यप्रकाशनम्।
14.पात्रः वृन्दावन : धार्मिकस्रोतस्सु शिक्षादर्शनम्, भुवनेश्वरम्, दिव्यप्रकाशनम्।
15.पाण्डेय, के.पी. : शिक्षा के दार्शनिक एवं सामाजिक आधार, वाराणसी, विश्वविद्यालय प्रकाशनम्।
16.पाण्डेय, रामशकल : शिक्षा की दार्शनिक एवं समाजशास्त्रीय पृष्ठभूमि, आगरा, विनोद पुस्तक मन्दिर।
17.बालाजी, रामचन्द्रुल : दार्शनिक विचारधाराः, वेरावल, श्री सोमानाथसंस्कृतविश्वविद्यालय।
18.मिश्रः, भास्करः, वैदिक शिक्षा मीमांसा, दिल्ली, ईस्टर्न बुक लिंकर्स।
19.मिश्रः, रमाकान्तः, भारतीयशिक्षादर्शनम्, नई दिल्ली, चौखम्भा पब्लिकेशन।
20.मिश्रः रमाकान्तः, शिक्षायां दार्शनिकवादाः, नई दिल्ली, चौखम्भा पब्लिकेशन।
21.मिश्रः, लोकमान्यः, भारतीयाः शिक्षाशास्त्रिणः, लखनऊ, गोमतीनगरम्।
22.शर्मा, आर.ए. (1995) : तत्वमीमांसा, मूलमीमांसा एवं शिक्षा, मेरठ, अमरलाल बुक डिपो।
23.शर्मा, कुलदीपः, भारतीयं शिक्षादर्शनम्, जयपुरम्, जगदीशसंस्कृतपुस्तकालयम्।
24.साहू, सोमनाथः, शिक्षायाः दार्शनिकाधाराः, जयपुरम्, जगदीशसंस्कृतपुस्तकालयम्।
25.सिकरवारः, प्रेमसिंहः शिक्षायाः दार्शनिकसामाजिकाधाराः, जयपुरम्, एम.बी. पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।
26.Altekar, A.S.: Education in Ancient India, Banaras, Nand Kishor & Sons.
27.Brubeker, J.S. (1969): Modern Philosophy of Education, New Delhi, Macgrow Hill Publishing.
28.Report of New Education Policy, 2020, New Delhi, Ministry of Education, Govt. of India.

## 3.1.5 साहित्यम् - I

**सत्रार्द्धः - 4** **श्रेयोऽङ्कः - 4**

**3.1.5.1 पाठ्यपरिचयः (About the course) शब्दशक्तिः (साहित्यदर्पणः - द्वितीयः परिच्छेदः)**

इह वाक्यलक्षणेन सह अभिधा-लक्षणा-व्यञ्जनारूपाः तिस्रः शब्दशक्तयः प्रतिपादिताः। शब्दशक्तीनाम् अवबोधो भविष्यति।

**3.1.5.2 अधिगमपरिणामः (Learning Outcome)**

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- वाक्यस्य स्वरूपं भोत्स्यन्ते।
- अभिधाशक्तेः प्रतिपादने समर्था भविष्यन्ति।
- लक्षणाशक्तेः बोधने शक्ता भविष्यन्ति।
- व्यञ्जनाशक्तिं बोधयितुं शक्ष्यन्ति।
- अभिधानियामकान् अवगमिष्यन्ति।
- वाक्यशक्तेः तात्पर्यस्य निरूपणे समर्था भविष्यन्ति।
- प्रयुक्तेषु शब्दान्तरेषु शब्दशक्तीनां गवेषणायां कौशलम् अधिगमिष्यन्ति।

| पाठ्यांशः (Unit) | विवरणम् |
|---|---|
| **1. वाक्यादिस्वरूपम्** | • वाक्यलक्षणम्<br>• पदलक्षणम्<br>• अर्थत्रैविध्यम्<br>• अभिधालक्षणम् |
| **2. लक्षणा तद्भेदाश्च** | • लक्षणावृत्तिः<br>• कर्मणि कुशलः<br>• लक्षणाभेदाः (व्यङ्ग्यस्य गूढागूढभेदपर्यन्ताः षोडशभेदाः)<br>• गौर्वाहीकः |



YsRamesh

3. **व्यञ्जना तद्भेदाश्च**
- व्यञ्जनास्वरूपम्
- अभिधामूला व्यञ्जना
- लक्षणामूला व्यञ्जना
- शाब्दी व्यञ्जना
- आर्थी व्यञ्जना

4. **संयोगादयः**
- संयोगः, विप्रयोगः, साहचर्यम्, विरोधिता
- अर्थः, प्रकरणम्, लिङ्गम्, अन्यस्य शब्दस्य सन्निधिः, सामर्थ्यम्
- औचिती, देशः, कालः, व्यक्तिः, स्वरादिः

**3.1.5.3 प्रायोगिकम् (Practicum)**

1. प्रदत्तविषयानुसारेण भाषणम्।
2. प्रदत्तविषयानुसारेण आडियो-विडियो निर्माणम्।
3. पठितोदाहरणानुसारेण शब्दान्तरेष्वपि शब्दशक्तेरनुसन्धानम्।
4. प्रश्नमञ्चः।
5. अनेकार्थकशब्दानाम् अनुसन्धानम्।

**3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction) -**

व्याख्यानात्मको विधिराश्रयणीयः। प्रतिपदं प्रतिवाक्यं च व्याख्येम्। निगूढाः अर्थाः प्रकाशनीयाः। शब्दशक्तीनां संस्कृते भाषान्तरे च स्थितानि उदाहरणानि बोध्यानि। शब्दशक्ति ज्ञानस्य काव्यशास्त्रीया उपयोगिता वक्तव्या।

**3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)-**

अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं चाश्रित्याकलनं कार्यं।

**3.1.5.6 स्वाध्यायसामग्री (Reading Material)**


1. साहित्यदर्पणः (द्वितीयपरिच्छेदः) आचार्यलोकमणिदहालः, चौखम्बासुरभारती- प्रकाशनम्, वाराणसी, 2008
2. साहित्यदर्पणः,लक्ष्मीटीका
3. साहित्यदर्पणः शालिग्रामशास्त्री, मोतीलाल बनारसी दास
4. काव्यप्रकाशः, मम्मटः, भट्टवामनाचार्यः, (झलकीकरः), परिमल- पब्लिकेशनम्, दिल्ली, 2008
5. रसगङ्गाधरः, पं.जगन्नाथः, पं.बदरीनाथझा, चौखम्बा विद्याभवन, वाराणसी, 2016

## 3.1.5 साहित्यम् - II

**सत्रार्द्धः - 4** **श्रेयोऽङ्कः – 4**

**3.1.5.1 पाठ्यपरिचयः (About the course)** शकुन्तलादुष्यन्तयोः **पुनः समागमः (अभिज्ञानशाकुन्तलम्- 4-7 अङ्काः)**

इह अभिज्ञानशाकुन्तलस्य चतुर्थमङ्कम् आरभ्य सप्तमं यावद् विषयो निर्धारितः, यत्र दुर्वाससः शापेन दुष्यन्तस्य विस्मृत्या शकुन्तलाया विरहः,मारीचाश्रमे पुनः समागमश्च मुख्यरूपेण वर्णितः।

**3.1.5.2 अधिगमपरिणामः (Learning Outcome)**

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- अभिज्ञानशाकुन्तलस्य निर्धारितान् अंशान् अवभोत्स्यते।
- पर्यावरणं प्रति जागरूकता।
- पुत्रीवात्सल्यस्यानुभवः ।
- राजकर्तव्यस्यावगतिः ।
- कालिदासरचनारीतेर्ज्ञानम् ।
- नाट्यरचनायां प्रवृत्तिः ।

| पाठ्यांशः (Unit) | विवरणम् |
|---|---|
| 1. शकुन्तलायाः पतिगृहगमनम् | • शकुन्तलायाः पतिगृहगमननिर्णयः<br>• कण्वस्य वात्सल्यम्<br>• आश्रमवासिनां विह्वलता<br>• कण्वोपदेशः<br>• शकुन्तलायाः सुप्रस्थानम् |
| 2. विवाहविस्मृतिवृत्तान्तः | • जननान्तरसौहृदम्<br>• परोपकारिस्वभावः<br>• वैरीभवति सौहृदम्<br>• प्रभुतायाः क्लेशः |



HS Ranew

3. **अभिज्ञानवृत्तान्तः**

- धीवरस्योपदेशः व्रीडाविलक्षं गोत्रस्खालित्यं च
- मनसिजेन दुष्यन्ते शरस्य प्रहारः
- चित्रीकृता कान्ता
- वसुन्धरा महते फलाय, जनानां महिम्नः प्रतिपत्तिः च

4. **दुष्यन्तशकुन्तलयोः समागमः**

- सत्क्रियागुणगणनम्
- राजमातलिसंवादः धर्माभिषेकक्रिया च
- मारीचाश्रमवर्णनम्
- शकुन्तलाया नियतैकपतिव्रतत्वम्

**3.1.5.3 प्रायोगिकम् (Practicum)**

1. रस-भावान्वेषणम्
2. प्रदत्तविषयानुसारेण व्याख्यानम्
3. प्रदत्तसंवादस्याभिनयः
4. प्रदत्तविषयान्तरानुसारेण संवादलेखनम्
5. प्रश्नमञ्चः

**3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction) -**

व्याख्यानात्मको विधिराश्रयणीयः। श्लोकव्याख्याने खण्डान्वय-दण्डान्वय रीतिराश्रयणीयाः। व्यङ्ग्यार्थाः प्रतिपादनीयाः निहिता उपदेशा बोधनीयाः। नाट्यसंवादः कारणीयः।

**3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)**

अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं चाश्रित्याकलनं कार्यं।

**3.1.5.6 स्वाध्यायसामग्री (Reading Material)**

1. अभिज्ञानशाकुन्तलम्, कालिदासः, राघवभट्टः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2016
2. कालिदासग्रन्थावली, कालिदास, ब्रह्मानन्दत्रिपाठी, पण्डित रामतेजशास्त्री, चौखम्बासुरभारती प्रकाशन, वाराणसी, 2019
3. संस्कृतसाहित्य का इतिहास, उमाशंकर शर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी-2001
4. संस्कृतसाहित्य का इतिहास, बलदेव उपाध्याय वाराणसी



JSRawat

## 3.1.5 व्याकरणम् - I

**सत्रार्द्धः - 4** **श्रेयोऽङ्कः - 4**

**3.1.5.1 पाठ्यपरिचयः (About the course) भ्वादिधातुरूपसिद्धयः**

पाठ्येऽस्मिन् वैयाकरणसिद्धान्तकौमुद्याः भ्वादिप्रकरणं दत्तमस्ति। अत्र लट्-लिट्-लुट्-लृट्-लेट्-लोट्-लङ्-लिङ्-लुङ्-लृङ्लकाराणां परिचयो दत्तोऽस्ति। भ्वादिप्रकरणस्थैः धातुभिर्निष्पन्नानां तिङन्तशब्दानां सिद्धिप्रक्रिया अत्र दत्ताऽस्ति।

**3.1.5.2 अधिगमपरिणामाः (Learning Outcome)**

छात्राध्यापका अमुं पाठ्यमधीत्य -

- लडादिलकाराणां परिचयं प्राप्स्यन्ति।
- आत्मनेपदस्य परस्मैपदस्य च लक्षणं ज्ञास्यन्ति।
- आत्मनेपदस्य परस्मैपदस्य च कुत्र प्रयोग इति ज्ञास्यन्ति।
- भ्वादिप्रकरणस्थैः धातुभिर्निष्पन्नानां तिङन्तशब्दानां सिद्धिप्रक्रियां विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्थाः भविष्यन्ति।

**पाठ्यांशः –**

1 'भू सत्तायाम्' इत्यतः 'कत्थ श्लाघायाम्' इत्यन्तो भागः।

अष्टाध्यायीधारणा - 'प्राग्वहतेष्ठक्' इत्यतः 'आवसथात् ष्ठल्' इत्यन्तम्।

2 'अत सातत्यगमने' इत्यतः 'खर्ज पूजने' इत्यन्तो भागः।

अष्टाध्यायीधारणा - 'प्राग्घिताद्यत्' इत्यतः 'भावे च' इत्यन्तम्।

3 'अज गतिक्षेपणयोः' इत्यतः 'कृपू सामर्थ्ये' इत्यन्तो भागः।

अष्टाध्यायीधारणा - 'प्राक्क्रीताच्छः' इत्यतः 'उत्तरपथेनाहृतं च' इत्यन्तम्।

4 'घट चेष्टायाम्' इत्यतः 'ऋतेरीयङ्' इत्यन्तो भागः।

अष्टाध्यायीधारणा - 'कालात्' इत्यतः 'ब्रह्मणस्त्वः' इत्यन्तम्।

**3.1.5.3 प्रायोगिकम् (Practicum)**

1. प्रातिपदिकं समवलोक्य स्त्रीप्रत्ययानां योजनम्।
2. प्रदत्तविषयानुसारेण लेखनम्।
3. प्रदत्तविषयानुसारेण भाषणम्।
4. अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं कुर्युः।
5. सूत्रस्थपदानां परिचयं दद्युः।



YsRaveen

6. सूत्रान्त्याक्षरी भवेत्।
7. व्याकरणप्रश्नमञ्चो भवेत्।
8. पाठ्यांशस्य पारायणं भवेत्।
9. अधीतशब्दैः वाक्यप्रयोगं कुर्युः ।
10. छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत।
11. गणशः छात्रान् प्रकल्प्य शास्त्रार्थः कारणीयः ।

**3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)**

- आगमनविधि:
- निगमनविधि:
- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन

**3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**3.1.5.6 स्वाध्यायसामग्री (Reading Materials)**

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता) अथ च गोपालदत्तपाण्डेयसम्पादिता** - तत्त्वबोधिनीव्याख्या, बालमनोरमाव्याख्या, लक्ष्मीव्याख्या, दीपिकाव्याख्या, चन्द्रकलाव्याख्या, श्रीधरीव्याख्या । दीक्षितपुष्पाकृत- नव्यसिद्धान्तकौमुदी, धन्वाडगोपालकृष्णाचार्यसोमयाजी कृता – तिङन्तार्णवतरणिः, प्रो.बोधकुमारझाः – अद्भुतधातुरूपावलिः ।

**प्रकाशक:** – चौखम्बासंस्कृतप्रतिष्ठानम्, देहली। मोतीलालबनारसीदास: वाराणसी।

## 3.1.5 व्याकरणम् - II

**सत्रार्द्धः - 4** **श्रेयोऽङ्कः - 1**

**3.1.5.1 पाठ्यपरिचयः (About the course) बहुव्रीहि-द्वन्द्व-एकशेष-सर्वसमासान्त-समासाश्रयविधयः**

पाठ्येऽस्मिन् वैयाकरणसिद्धान्तकौमुद्या बहुव्रीहि-द्वन्द्व-एकशेष-सर्वसमासान्त-समासाश्रयप्रकरणानि सन्ति। अत्र बहुव्रीहि-द्वन्द्वसमासनिष्पन्नशब्दाः सन्ति। एकशेषेण निष्पन्नाः शब्दा अपि अत्र सन्ति। सर्वसमासान्तसमासाश्रयविधिभिर्निष्पन्नाः शब्दा अप्यत्र दत्ताः सन्ति।

**3.1.5.2 अधिगमपरिणामः (Learning Outcome)**

छात्राध्यापका अमुं पाठ्यमधीत्य –

- बहुव्रीहिसमासेन निष्पन्नानां शब्दानां रूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- द्वन्द्वसमासेन निष्पन्नानां शब्दानां रूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- सर्वसमासान्तविधिना निष्पन्नानां शब्दानां रूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- समासाश्रयविधिना निष्पन्नानां शब्दानां रूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।

**पाठ्यांशः**

1 'शेषो बहुव्रीहिः' इत्यतः 'निष्प्रवाणिश्च' इति सूत्रान्तो भागः ।
अष्टाध्यायीधारणा -'धान्यानां भवने क्षेत्रे खञ्' इत्यतः 'तत्र कुशलः पथः' इत्यन्तम् ।

2 'सप्तमीविशेषणे बहुव्रीहौ' इत्यतः 'समासः षड्विधो बुधैः' इति सूत्रान्तो भागः ।
अष्टाध्यायीधारणा - 'आकर्षादिभ्यः कन्' इत्यतः 'अहंशुभमोर्युस्' इत्यन्तम् ।

3 'ऋक्पूरब्धूः पथामानक्षे' इत्यतः 'मातृपितृभ्यां स्वसा' इति सूत्रान्तो भागः ।
अष्टाध्यायीधारणा -'प्राग्दिशो विभक्तिः' इत्यतः 'प्रकारवचने जातीयर्' इत्यन्तम् ।

4 'घरूपकल्पचेलड्ब्रुवगोत्र०' इत्यतः 'प्रायस्य चित्तिचित्तयोः' इति सूत्रान्तो भागः ।
अष्टाध्यायीधारणा -'प्रागिवात्कः' इत्यतः 'विभाषा बहोर्धाविप्रकृष्टकाले' इत्यन्तम् ।

**3.1.5.3 प्रायोगिकम् (Practicum)**

1. प्रातिपदिकं समवलोक्य स्त्रीप्रत्ययानां योजनम् ।
2. प्रदत्तविषयानुसारेण लेखनम् ।
3. प्रदत्तविषयानुसारेण भाषणम् ।
4. अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं दद्युः ।



JS Raveen

5. सूत्रस्थपदानां परिचयं दद्युः ।
6. सूत्रान्त्याक्षरी भवेत् ।
7. व्याकरणप्रश्नमञ्चो भवेत् ।
8. पाठ्यांशस्य पारायणं भवेत् ।
9. अधीतशब्दैः वाक्यप्रयोगं कुर्युः ।
10. छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत ।
11. गणशः छात्रान् प्रकल्प्य शास्त्रार्थः कारणीयः ।

**3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)**

- आगमनविधिः
- निगमनविधिः
- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन

**3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**3.1.5.7 स्वाध्यायसामग्री (Reading Materials)**

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता) अथ च गोपालदत्तपाण्डेयसम्पादिता** - तत्त्वबोधिनीव्याख्या, बालमनोरमाव्याख्या, लक्ष्मीव्याख्या, दीपिकाव्याख्या, चन्द्रकलाव्याख्या, श्रीधरीव्याख्या ।

**प्रकाशकः** – चौखम्बासंस्कृतप्रतिष्ठानम्, देहली । मोतीलालबनारसीदासः वाराणसी ।



JS Rameen

## 3.1.5 दर्शनम् - I

**सत्रार्द्धः – 4** **श्रेयोऽङ्कः - 4**

### 3.1.5.1 पाठ्यपरिचयः (About the course)

नव्यन्यायशास्त्रस्य सिद्धान्तान् परिज्ञातुम् इदं पाठ्यं परिकलितं विद्यते । अयं पाठ्यविषयः नव्यन्यायस्य लक्षणपरिष्कारात्मिकां शैलीम् अधिगन्तुं नव्यन्यायमतेन च पदार्थबोधाय उपकारको भविष्यति। संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति । तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम् । तदेतस्य प्रमाणशास्त्रस्य उत्कर्षः नव्यन्याये विद्यते । एतस्मिन् पाठ्यविषये निर्धारिताः नव्यन्यायशास्त्रस्य पदार्थविचाराः अध्येतुः शास्त्रबोधाय उपकारकाः भवन्ति ।

### 3.1.5.2 अधिगमपरिणामः (Learning Outcome)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- नव्यन्यायस्य तत्त्वमीमांसां विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति ।
- नव्यन्यायस्य लक्षणपरिष्कारान् प्रबोधयितुं प्रभविष्यन्ति
- न्यायशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति ।

| पाठ्यांशः | विवरणम् |
|---|---|
| १. **जल-तेज-वायु-आकाश-कालद्रव्याणि** | • जलनिरूपणम्<br>• जलत्वजातिसिद्धिः<br>• जलविशेषगुणनिरूपणम्<br>• जलभेदाः<br>• जलीयं शरीरम्, इन्द्रियं विषयश्च<br>• तेजोलक्षणम्<br>• तैजसशरीरनिरूपणं तैजसम् इन्द्रियं च<br>• तैजसविषयनिरूपणम् (सुवर्णस्य तैजसत्वसाधनम्)<br>• वायुलक्षणम् |



Ysharan

- श्रोत्रन्द्रियनिरूपणम्
- आकाशसाधनम्
- कालनिरूपणम्
- कालोपाधिनिरूपणम्
- कालिकं परत्वम् अपरत्वं च
- दिक्-प्रमाणनिरूपणम्
- दैशिकं परत्वम् अपरत्वं च

**२. आत्मनिरूपणम्**

- आत्मनिरूपणम्
- आत्मनि प्रमाणकथनम्
- शरीरात्मवादखण्डनम्
- इन्द्रियात्मवादखण्डनम्
- मनस आत्मत्वखण्डनम्
- क्षणिकविज्ञानात्मवादः
- क्षणिकविज्ञानात्मवादखण्डनम्
- नित्यविज्ञानात्मवादः
- नित्यविज्ञानात्मवादखण्डनम्
- आत्मनः स्वरूपविषये सांख्यमतम्
- आत्मनः स्वरूपविषये सांख्यमतखण्डनम्
- आत्मनि प्रमाणनिरूपणम्
- आत्मगुणाः
- बुद्धिनिरूपणम्

- **प्रमाणबोधः**

    - प्रमाणसामान्यनिरूपणम्
    - प्रमाणानां संख्याविषये विविधमतानि
    - प्रमाणानां संख्याविषये चार्वाकादिमतखण्डनम्
    - न्यायमतेन प्रमाणचतुष्टयम्
    - प्रमाविशेषलक्षणानि
    - प्रत्यक्षलक्षणम्
    - अनुमितिलक्षणम्
    - उपमितिलक्षणम्
    - शाब्दबोधलक्षणम्
    - प्रमाणविशेषलक्षणानि

**३. प्रत्यक्षप्रमाणम्**

- षड्विधं प्रत्यक्षम्
- प्रत्यक्षविषयाः
- चाक्षुषप्रत्यक्षे कारणानि
- वायु-कालादि-द्रव्यप्रत्यक्षे विविधमतानि
- त्वङ्मनःसंयोगज्ञानहेतुत्वम्
- मनोग्राह्यविषयनिरूपणम्
- निर्विकल्पकप्रत्यक्षम्
- निर्विकल्पकस्य अतीन्द्रियत्वनिरूपणम्
- इन्द्रियलक्षणपरीक्षणम्
- षड्विधः सन्निकर्षः
- विशेषणतासन्निकर्षनिरूपणम्
- योग्यानुपलब्धिनिरूपणम्



YSRamesh

- अलौकिकसन्निकर्षाः
- सामान्यलक्षणानिरूपणम्
- ज्ञानलक्षणसन्निकर्षनिरूपणम्
- योगजसन्निकर्षनिरूपणम्

### 3.1.5.3 प्रायोगिकम् (Practicum)

अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- नव्यन्यायस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च ।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
- लक्षणवाक्यम् अवलोक्य तत्र परिष्कारादिकथनपूर्वकम् अध्यापनप्रस्तुतिः ।
- पुस्तकालय-परियोजना – कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
- नव्यन्यायस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि ।
- न्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

### 3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)

- वेदान्तदर्शनस्य प्रवचने अधिकरणपद्धतेः सम्प्रयोगः । अधिकरणस्य स्वरूपं सम्प्रेषणे च सम्प्रयोगं छात्राध्यापकाः यथा जानीयुः तथा विषयः संशयः पूर्वपक्षःसिद्धान्तपक्षः निर्णयश्च इति पञ्चानामपि अङ्गानां प्रस्तुतिः (व्याख्यानद्वारा/PPT द्वारा) । व्याख्यानान्ते उत्तराध्ययनसूत्र-सन्दर्भाः वक्तव्याः येन जिज्ञासायां सत्यां छात्राध्यापकाः तस्मिन् विषये इतोऽप्यधिकम् अध्ययनं कर्तुं शक्नुयुः ।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः ।

**3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)**

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**3.1.5.6 स्वाध्यायसामग्री (Reading Material)**

- न्यायसिद्धान्तमुक्तावली (प्रत्यक्षखण्डः), विश्वनाथपञ्चाननभट्टाचार्यविरचिता, चौखम्बा-सुरभारती-प्रकाशनं, वाराणसी।
- कारिकावली, विश्वनाथपञ्चाननभट्टाचार्यविरचिता, केन्द्रीयसंस्कृतविश्वविद्यालयः, नईदिल्ली।
- भारतीय दर्शन, बलदेव उपाध्याय, शारदा प्रकाशन, वाराणसी।

## 3.1.5 दर्शनम् - II

**सत्रार्द्धः – 4** **श्रेयोऽङ्कः - 4**

### 3.1.5.1 पाठ्यपरिचयः (About the course)

महर्षिकपिलप्रणीतम् साङ्ख्यदर्शनं भारतीयदर्शनप्रस्थानेषु अनन्यसाधारणं महत्त्वम् बिभर्ति। ईश्वरकृष्णविरचिता साङ्ख्यकारिका अस्य दर्शनस्य महत्त्वपूर्णः प्रामाणिकश्च ग्रन्थः । तत्र सर्वतन्त्रस्वतन्त्र इत्यभिख्यां धारयतः श्रीवाचस्पतिमिश्रस्य साङ्ख्यतत्त्वकौमुदी इति टीका दर्शनजगति नितरां प्रसिद्धा वर्तते । साङ्ख्यतत्त्वकौमुदीम् अवलम्ब्य निर्मितोऽयं पाठ्यक्रमः अध्येतुः कृते साङ्ख्यशास्त्रबोधाय उपकारको भविष्यति। अस्मिन् पाठ्यविषये साङ्ख्यदर्शनानुसारेण सर्गक्रमस्य बन्धमोक्षविचारस्य च समुचितः सन्निवेशः अस्ति।

### 3.1.5.2 अधिगमपरिणामः (Learning Outcome)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- साङ्ख्यदर्शनस्य तत्त्वमीमांसां विज्ञापयितुं समर्थाः भविष्यन्ति।
- साङ्ख्य-शास्त्रस्य सर्गप्रक्रियां बोधयितुं शक्ष्यन्ति ।
- साङ्ख्यशास्त्रस्य सिद्धान्तान् पाठयितुं प्रभविष्यन्ति ।
- साङ्ख्यदर्शनस्य ज्ञानपरम्परां प्रबोधयितुं प्रावीण्यं प्राप्स्यन्ति ।

| पाठ्यांशः | विवरणम् |
|---|---|
| ४. **सर्गक्रमः** | • सर्गक्रमनिरूपणम्<br>• महत्तत्त्वलक्षणम्<br>• बुद्धेः सात्त्विकाः धर्माः<br>• अहङ्कारलक्षणम्<br>• अहङ्कारस्य कार्यभेदाः<br>• बाह्येन्द्रियदशकम्<br>• मनोनिरूपणम्<br>• मनस इन्द्रियत्वसाधनम् |

- दशेन्द्रियवृत्तिनिरूपणम्
- अन्तःकरणत्रयस्य द्विविधवृत्तिः
- वृत्तीनां यौगपद्यायौगपद्यनिरूपणम्
- करणानां परप्रेर्यत्वाभावः
- करणानां विभागः
- करणव्यापारनिरूपणम्
- बाह्यान्तःकरणयोर्वैधर्म्यम्
- बुद्धीन्द्रियाणां विशेषाविशेषविषयकत्वम्
- करणानां प्रधानगुणभावनिरूपणम्
- विशेषाविशेषनिरूपणम्

**५. सूक्ष्मशरीरम्**

- सूक्ष्मशरीरनिरूपणम्
- सूक्ष्मशरीरलक्षणम्
- सूक्ष्मशरीरस्य संसरणम्
- सूक्ष्मशरीरस्य लिङ्गत्वम्
- सूक्ष्मशरीरे प्रमाणम्
- सूक्ष्मशरीरस्य संसरणप्रकारः
- सूक्ष्मशरीरस्य संसरणे हेतुः
- निमित्तनैमित्तिकविभागः
- धर्माद्यष्टभावानां फलम्
- बन्धत्रयनिरूपणम्

**६. प्रत्ययसर्गः**

- प्रत्ययसर्गः
- प्रत्ययसर्गस्य पञ्चाशद् भेदाः
- विपर्ययभेदाः



JSRaveen

- अशक्तिभेदाः
- तुष्टिभेदाः
- सिद्धिभेदाः
- विपर्ययभेदानाम् अवान्तरभेदाः
- गौणमुख्यसिद्ध्यष्टकनिरूपणम्
- लिङ्गभावसर्गयोः निरूपणम्
- लिङ्गभावसर्गयोः फलनिरूपणम्
- भूतादिसर्गस्य भेदाः
- सर्गस्य दुःखहेतुत्वम्

**७. बन्धमोक्षविमर्शः**

- वैराग्यं मोक्षसाधनम्
- सृष्टिकारणे विप्रतिपत्तिनिरासः
- जडस्य स्वतन्त्रप्रवृत्तिनिरूपणम्
- प्रकृतेः निवृत्तिनिमित्तनिरूपणम्
- प्रकृतेः साक्षात्कारानन्तरम् पुनः अप्रवृत्तिः
- निर्गुणपुरुषस्य मोक्षसंसाराद्यसम्भवत्वम्
- प्रकृतेः अष्टरूपाणां बन्धमोक्षजनकत्वम्
- तत्त्वज्ञानस्य स्वरूपम्
- तत्त्वज्ञानानन्तरम् उदासीनतया प्रकृतेः दर्शनम्
- तत्त्वज्ञाने सति संयोगस्य सर्गाऽजनकत्वम्
- परममुक्तिःसाङ्ख्यशास्त्रस्य परमर्षिपूर्वकत्वम्
- साङ्ख्यदर्शनस्य आचार्यपरम्परा



NS Rawat

### 3.1.5.3 प्रायोगिकम् (Practicum)

अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- साङ्ख्यदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- सर्गचित्रम् अवलोक्य साङ्ख्यमतेन वर्णनम्। अथवा कारिकाशः तालिकानिर्माणम्।
- पुस्तकालय-परियोजना – कमप्येकं सांख्यसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- साङ्ख्यशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।
- साङ्ख्यदर्शनस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि।

### 3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)

- साङ्ख्यदर्शनस्य प्रवचने अधिकरणपद्धतेः सम्प्रयोगः। अधिकरणस्य स्वरूपं सम्प्रेषणे च सम्प्रयोगं छात्राध्यापकाः यथा जानीयुः तथा विषयः संशयः पूर्वपक्षः सिद्धान्तपक्षः निर्णयश्च इति पञ्चानामपि अङ्गानां प्रस्तुतिः (व्याख्यानद्वारा/PPT द्वारा) भवेत्।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम्। उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया। छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः

### 3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

### 3.1.5.6 स्वाध्यायसामग्री (Reading Material)

- सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्रः, व्याख्या- पं. गजाननशास्त्रिमुसलगाँवकरः चौखम्बा-सुरभारती-प्रकाशनं, वाराणसी।
- सांख्यकारिका, ईश्वरकृष्णः, चौखम्बा प्रकाशन, वाराणसी।
- साङ्ख्यायनम्, प्रो. सुकान्तकुमारसेनापतिः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीसदाशिवपरिसरः, पुरी, ओडिशा।
- भारतीय दर्शन, बलदेव उपाध्याय, शारदा प्रकाशन, वाराणसी।



HSRamesh

## 3.1.5 फलितज्योतिषम् - I

**सत्रार्द्धः – 4** **श्रेयोङ्कः - 4**

**3.1.5.1 पाठ्यपरिचयः (About the course)**

ज्योतिषशास्त्रस्याध्ययने गोलज्ञानस्य परमावश्यकं वर्तते। सम्पूर्ण आकाशस्य प्रतिकृति भवति गोलः। गोलज्ञाने महदाधारभूतबिन्दूनां ज्ञानं भवति यथा- गोललक्षणम्, महद्वृत्तः, लघुवृत्तः, गर्भकेन्द्रम्, पृष्ठकेन्द्रम्, याम्योत्तर-क्षितिज-समस्थान-पूर्वापर-कोण-नाडीवृत्तपरिभाषाः। आयुर्दायदशानिर्णयः, आजीविकाविचारः, राजयोगाः, पञ्चमहापुरुषयोगाः, नाभसयोगाश्च।

**3.1.5.2 अधिगमपरिणामः (Learning Outcome)**

एतस्य पाठ्यांशस्य अध्ययनानन्तरं छात्राध्यापकाः-

1. समग्राकाशस्य ज्ञानं कर्तुं भविष्यन्ति, यथा आकाशे के- के वृत्ताः सन्ति? .
2. जातकस्य दशाफलं दृष्ट्वा शुभाशुभफलनिर्णयं कर्तुं शक्ष्यन्ति।
3. जातकस्य आयुर्निर्णयं आजीविकानिर्णयं च ज्ञातुं शक्नुवन्ति।
4. जातकस्य कुण्डल्यां राजयोगानां नाभसयोगानाञ्च अन्विष्य फलादेशं कर्तुं शक्ष्यन्ति।

पाठ्यांशः 1

गोललक्षणम्, महद्वृत्तलघुवृत्तपरिभाषा, गर्भकेन्द्रगोलकेन्द्र, पृष्ठकेन्द्रपरिभाषाः, भूगोलस्वरूपम्, स्वस्थान-खस्वस्तिक-ध्रुवस्थानपरिचयःच। याम्योत्तर-क्षितिज-समस्थान-पूर्वापर-कोणवृत्त-नाडीवृत्तपरिभाषाः, निरक्षदेश-रेखावृत्त-रेखादेश-उन्मण्डल-कदम्बवृत्त-क्रान्तिवृत्त-गोलसन्धि-अयनवृत्तपरिभाषाः च।

पाठ्यांशः 2

विमण्डल-दृङ्मण्डल-उन्नतांश-शङ्कु-दृग्ज्या-दिगंशपरिभाषाः, लग्नादिस्वरूपंदृक्षेपदृग्गतीअग्रा-क्रान्त्यक्षांशलम्बांश-ग्रहस्थान-शरपरिभाषाःच। उपवृत्त-भुज-कोटिपरिभाषाः,चर-उदयमान-दृग्लम्बन-स्फुटलम्बन-नतिपरिभाषाः, हृति-तद्धृति-इष्टहृति-अन्त्यापरिभाषाःवृत्त-चाप-ज्या-कुज्या-स्पर्श-कोटिस्पर्श-छेदन-कोटिच्छेदनरेखापरिभाषाःच।

पाठ्यांशः 3

आयुर्दायनिर्णयः, दशाफलानि।

पाठ्यांशः 4

आजीविकाविचारः, राजयोगाः, पञ्चमहापुरुषयोगाश्च, नाभसयोगाः।



JSRaneo

### 3.1.5.3 प्रायोगिकम् (Practicum)

अमुं पाठ्यांशमधीत्य प्रत्येकं छात्राध्यापकाः

1. गोलयन्त्रस्य निर्माणं करिष्यन्ति।
2. पृथक-पृथक याम्योत्तर-क्षितिजादयवृत्तानां फलके सम्यकचित्रणं कृत्वा समर्पयेयुः।
3. परस्परं कुण्डल्याम् आयुर्निणयं दशाफलं च दृष्ट्वा अभ्यासं करिष्यन्ति।
4. समाजे लब्धप्रतिष्ठां जनानां कुण्डलीनिर्माय तेषाम् आजीविका-राजयोग-पञ्चमहापुरुषयोगान् निर्णीय फलादेशं करिष्यन्ति।

### 3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)

1. पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेनग्रन्थदिशा कक्षाध्यापनम्।
2. गोलयन्त्रेण छात्राध्यापकान् याम्योत्तर-क्षितिजादीनां वृत्तानां अध्यापनम् ।
3. कस्यचिज्जातकस्य जन्मकुण्डलीं स्वीकृत्य तस्य आयुर्निणयस्य दशाफलस्य च उदाहरणं प्रदर्शनीयम्।
4. कस्यचित् महापुरुषस्य जन्मकुण्डल्याम् आजीविकां राजयोगानां नाभसयोगानाञ्च उदाहरणरूपेण छात्राध्यापकानां सम्मुखे प्रदर्शनीयम्।

### 3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)

- लिखितपरीक्षणम् तथा प्रदत्तकार्यस्य परीक्षणं भविष्यति।

### 3.1.5.6 स्वाध्यायसामग्री (Reading Material)

1. गोलपरिभाषा (पं.सीतारामझाकृता)
2. जैमिनीयसूत्रम्
3. बृहज्जातकम् (केदारदत्त जोशी)
4. जातकपारिजातः
5. सारावली
6. फलदीपिका

## 3.1.5 सिद्धान्तज्योतिषम् - II

**सत्रार्द्धः – 4** **श्रेयोङ्कः - 4**

### 3.1.5.1 पाठ्यपरिचयः (About the course)

अस्मिन् पाठ्यांशे सिद्धान्तशिरोमणिग्रन्थस्य स्पष्टाधिकारस्य अध्ययनं भविष्यति। ग्रहाणां स्पष्टीकरणस्य प्रयोजनम्, चतुर्विंशतिज्याखण्डानि, ज्यासाधनम्, चापतः ज्यासाधनम्, ज्यातः चापसाधनम्, इष्टक्रान्तिसाधनम्, केन्द्रानयनम्, भुजकोटिज्यासाधनम्, मन्दफलसाधनम्, शीघ्रोच्चादीनां प्रभावः, गत्यन्तरे हेतुः, ग्रहे धनर्णत्वम्, पाताकर्षणम्, ग्रहाणां मन्दपरिध्यंशाः, इष्टपरिध्यंशज्ञानम्, शीघ्रकर्णानयनम्, शीघ्रफलसाधनं च। ग्रहाणां स्फुटीकर्णार्थं संस्काराः, भुजान्तरसंस्कारः, शरानयनम्, स्पष्टक्रान्तिज्ञानम्, क्रान्तिज्या, भुजज्या, चरसंस्कारादि मुख्यविषयाणां ज्ञानं भविष्यति।

### 3.1.5.2 अधिगमपरिणामः (Learning Outcome)

एतस्य पाठ्यांशस्य अध्ययनानन्तरं छात्राध्यापकाः-

1. ग्रहस्पष्टीकरणं तथा तस्य मुख्याङ्गानां ज्ञानं भविष्यति।
2. मध्यमग्रहस्पष्टग्रहयोरन्तरं ज्ञास्यन्ति।

पाठ्यांशः-1

ग्रहस्पष्टीकरणस्य प्रयोजनम्, चतुर्विंशतिज्याखण्डानि, ज्यासाधनम्, चापतः ज्यासाधनम्, ज्यातः चापसाधनम्, इष्टक्रान्तिसाधनम् च।

पाठ्यांशः-2

केन्द्रानयनम्, भुजकोटिज्यासाधनम्, मन्दफलसाधनम्, शीघ्रोच्चादीनां प्रभावः, गत्यन्तरे हेतुः, ग्रहे धनर्णत्वम्, पाताकर्षणम्, ग्रहाणां मन्दपरिध्यंशाः, भौमादीनां शीघ्रपरिध्यंशाः, इष्टपरिध्यंशज्ञानम्, शीघ्रकर्णानयनम्, शीघ्रफलसाधनं च।

पाठ्यांशः-3

ग्रहाणां स्फुटीकर्णार्थं संस्काराः, शीघ्रमन्दकर्मणोः धनर्णत्वम्, भुजान्तरसंस्कारः, वक्रारम्भ-वक्रत्यागे केन्द्रांशाः, मार्गारम्भकेन्द्रांशेषु हेतुः च।

पाठ्यांशः-4

शरानयनम्, क्रान्तिशरसंस्कारेणस्पष्टक्रान्तिज्ञानम्, ग्रहाणां स्फुटसावनादिमानम्,क्रान्तिज्या, भुजज्या, चराणां साधनम्, चरसंस्कारः, दिनरात्रिमानज्ञानम्, ग्रहाणां नक्षत्रादि ज्ञानं च।

### 3.1.5.3 प्रायोगिकम् (Practicum)

अमुं पाठ्यांशमधीत्य प्रत्येकं छात्राध्यापकाः-

1. चतुर्विंशतिज्याखण्डानां चित्रनिर्माणं फलके करिष्यन्ति।
2. अस्य पाठ्यांशस्य सर्वेषां बिन्दूनाम् उपस्थापनं स्व अभ्यासपुस्तिकायां गृहकार्यरूपेण करिष्यन्ति।



HSRameno

3. पाठ्यांशस्यास्य कमपि बिन्दूद्वयं स्वीकृत्य समूहचर्चां कुर्वन्तु।

### 3.1.5.4 प्रवचनप्रक्रिया (Mode of Transaction)

1. पाठ्याशांनां सरलमानकसंस्कृतमाध्यमेनग्रन्थदिशा कक्षाध्यापनम्।
2. वेधशालायां क्रान्तिसाधनस्य प्रायोगिकाध्यापनम्।
3. कक्षायां प्रति छात्राध्यापकम् उत्थाय प्रश्नोत्तरमाध्यमेन अध्यापनम्।

### 3.1.5.5 आकलनप्रक्रिया (Mode of Assessment)

- लिखितपरीक्षणम् तथा प्रदत्तकार्यस्य परीक्षणं भविष्यति।

### 3.1.5.6 स्वाध्यायसामग्री (Reading Material)

1. सूर्यसिद्धान्तः (तत्वामृतव्याख्योपेतः)
2. सिद्धान्तशिरोमणिः
3. सिद्धान्ततत्वविवेकः
4. शिष्यधीवृद्धिदम्



AS Ramesh

## 3.2 हिन्दी

**सत्रार्द्ध - 4** **श्रेय अंक - 4**

### 3.2.1 पाठ्य-परिचय (About the course) काव्यशास्त्र एवं आलोचना

